# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा -शास्त्रीतृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ८ | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्यौतिषम् | (C.C.- 3.5.10. Old & New ) | |
| दिनाङ्कः - १२/१२/२०१८ | सरलजन्मपत्रीविज्ञानम् । | समयः -१०.०० तः ०१.०० |

### प्रथमान्वितिः

**प्रश्नः १ अधोलिखितश्लोकानां सान्वयं व्याख्यां कुरुत ।( कोऽपि द्वे )** **( १० )**

(१) वालेन्दुनते वित्तं दीर्घे पृथुलोन्नते व्यामे ।
नासावंशविनिर्गतदले इव भ्रदले दिशतः ॥

(२) बिम्बाधरो धनाढ्यः प्रज्ञावान् पाटलाधरो भवति ।
प्रायोराज्यं लभते प्रवालवर्णाधरस्तु नरः ॥

(३) विप्रस्य यस्य यूपो वेदनिभं ब्रह्मतीर्थमपि हस्ते ।
विश्वाधितिर्निदतं स नवेदथवाऽग्निहोत्री सः ॥

**प्रश्नः २ अधोलिखितयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

(१) उदरलक्षणम्  (२) नासिकालक्षणम्

### द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितश्लोकानां सान्वयं व्याख्यां कुरुत ।( कोऽपि द्वे )** **( १० )**

(१) श्रीवत्सकार्मुकाद्या यस्य शिरारोमभिः कृता भाले ।
रेखाभिर्वा नृपतिर्भोगी वा जायते सपदि ॥

(२) चपलः स्थूलो रूक्षः पुरुषो धनमांसलः शिरोविचितः ।
स पुमान्वंतरणाख्यस्समुद्रपिशोषयत्यखिलम् ॥

(३) शस्ते कपोलफलके पीने वृत्ते समुन्नते विमले ।
पुलिने इव गङ्गायाः कुसुमायुधयादसां स्त्रीणाम् ॥

**प्रश्नः ४ अधोलिखितप्रश्नेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

(१) ललाटलक्षणम् । (२)प्रमाणविचारः ।

### तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितश्लोकानां सान्वयं व्याख्यां कुरुत ।( कोऽपि द्वे )** **( १० )**

(१) ध्वजे गजे वृषे सिंहे शीघ्रं लाभो भवेद्ध्रुवम् ।
ध्वांक्षे श्वाने खरे ध्रूमे नाशश्च कहलप्रदः ॥

(२) ध्वजे च सिंहे च वृषे शीघ्रं स्त्रियं सुरूपां लभते सुशीलाम्।
श्वाने गजे ध्वांक्षखरे च धूम्रे कार्यस्य हानि: कलहस्तथैव।

(३) ग्रहोविलनाद्यतमे गृहे तु तेनाऽऽहता द्वादशराशय: स्यु:।
तावद्दिनान्यागमनस्य विद्यान्निवर्तनं वक्रगतैर्ग्रहैस्तु॥

**प्रश्न: ६ अधोलिखितप्रश्नेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत। (१०)**

(१) प्रवासिनामागमनकालज्ञानम्

(२) मित्रस्यतथाचौरादिकस्यमेलनं भविष्यतिनवेतिप्रश्न:।

**चतुर्थान्विति:**

**प्रश्न: ७ अधोलिखितदशप्रश्नानां संक्षेपेण उत्तराणि ददतु। (१०)**

(१) सर्वप्रथमम् कस्य अङ्गस्य गणना भवति ?

(२) मनुष्याणां कति मुख्याङ्गानि सन्ति ?

(३) पिङ्गलरोमावलि: युक्त: जन: कीदृश: भवति ?

(४) यस्य उदर: समं स्याद् स मनुष्य: कीदृश: भवति ?

(५) मधुपिङ्गलरेखायुक्त: मनुष्य: कीदृश: भवति

(६) यस्य पाणिमूले यवमालास्यात् स: मनुष्य: कीदृश: भवति ?

(७) हस्ते सूर्यपर्वत: कुत्र विद्यते ?

(८) कति गुणा: सन्ति कानि च तानि ?

(९) देहिनां कति वर्णा: सम्भवन्ति ?

(१०) स्त्रीप्रकारा: कति सन्ति ?

(११) प्रकृतिशब्देन का संख्या ज्ञायते ?

(१२) मातुल: कस्य भावस्य संज्ञा ?

(१३) ध्वज आयस्य स्वामिग्रह: क: ?

(१४) अग्निकोणस्य स्वामिग्रह: क: ?

(१५) धृति: शब्देन का संख्या ज्ञायते ?

--००--